प्रथमाहोमंसमाप्यपुनर्विहरणादिसर्वंतंत्रंकर्तव्यमित्यर्थः॥अयमंत्रप्रयोगस्के
मः॥अग्निहोत्रापचारेणान्यापचारेणवापयसिस्के नेतदग्निरयदग्नये
तिजपेत्॥सर्वप्रायश्चित्तंविष्णुस्मरणं॥सर्वस्कंदनेऽन्योदुग्धातेनजुहुयात्॥ ३२

यदिप्राचीनहरणेत्रायांस्कंदेत्॥प्रजापतेविश्वभृतीत्यादिनाऽग्निमन्त्रयाःयत्रिष्टेन
जुहुयात्॥उन्नयनोनरंस्यात्लीनस्थस्यस्कंदनेसमान्यस्कंदनमंत्रप्राप्तिः॥पक्षत्र
या येषुकर्तांयांकांचिद्दारुणींजपित्वाकांचिद्दारुण्याप्रथमाकृतिंजुहुयात्॥नप्राकृत
मंत्रेण॥यजमानोऽनुज्ञांकुर्यात्॥पर्युदासोयंगालगारिमते॥पुनःकर्त्रापिकृतंहो
ममादृत्याकुर्यात्॥॥इतिपयसःस्कंदनेप्रायश्चित्तं॥॥अधिश्रितमग्निहोत्र
द्रव्यंस्थालीमृत्तेनस्रवतिचेत्तत्राश्वलायनः॥अग्निहोत्रमधिश्रितंस्रवद
भिमंत्रयेत्॥गर्भंस्रवंतमगदमकर्माग्निहोत्राधिश्रितंक्षीरं॥यत्रभृतेऽग्ना

३३ वेवतं नाभिघ्राप्नोति निर्ऋतिं परस्तादिति ॥ अभिमंत्रयते स्रुचं स्रवंतीमग्निहोत्रिकीं ॥ गर्भं स्रवंतमित्यादि परस्तादंतकेन तु ॥ मृदादिनाचसंदध्यादिधुंद्वाणमिलचेतिगोपालः ॥ अतोगर्भं स्रवंतमित्यभिमंत्र्य ॥ विधुंद्वाणंसमनेबहूनोयुवानंसंतंपलितोजगार ॥ देवस्यपश्यकाव्यंमहित्वाद्यामसारथेः समानेतिस्रवंतीं स्रुचांमृदालेपयेत् ॥ ततःसर्वंप्रायश्चित्तं ॥ ॥ इदंपयःसाधारणं ॥ ॥ अथोद्वासितस्याग्न्यग्न्यस्यस्कंदनेप्रायश्चित्तं ॥ ॥ स्कंनेद्ग्नेसमुद्रवःप्रहिणोमिस्वंयोनिमपिगछत ॥ अरिष्टाःअस्माकंवीरामयिगावःसंतुगोपताविति मंत्रेणाभि ३३

मंत्र्यशेषेण प्रचरेत् ॥ ॥ इत्युद्वासितस्कंनप्रायश्चित्तं ॥ ॥ अथाग्निहोत्रस्थालीमिन्नाचेन्नस्याःस्रुवेन्यांस्रुचंनिधायतामभिमंत्रयते ॥ भूरायुर्मेधारयतप्रजांमेधारयतपशून्मेधारयतमनआयुःप्राणःप्रजाःपशवोवःपरासिदेरंमिति ॥ ततोद्वादशाग्नीतेनस्रुचंपूरयित्वादुर्गादिगणेनमिंदादिगणेनचप्रायश्चित्तंवोधायनोनेकुर्यात् ॥ सर्वंप्रायश्चित्तं नाम्नातं ॥ भग्नामस्रुवक्षिपेत् ॥ भूमिर्भूमिमगान्मातामातरमग्यगात् ॥ भयाग्मपुत्रैःपशुभिर्योनोद्वेष्टिसमिद्यतामिति ॥ सर्वत्रमन्नयानोपात्रागांभेदनेइदमेवप्रायश्चित्तंइतिप्रायश्चित्तप्रदीपः ॥

३४ एतदेव बोधायनमतेपि॥ आश्वलायनस्तु॥ भिन्नांस्रुचौ भूर्भुवस्स्वरित्यप्सु प्रक्षिपेत्॥ तूष्णीं नवीनां योजयेत्॥ सर्वं प्रायश्चित्तं कुर्यात्॥ ॥ इति स्रुचौ भेदने प्रायश्चित्तं॥ ॥ अथ स्थालीभेदने भिन्नद्रव्यस्य प्रायश्चित्तं॥ भिन्नं द्रव्यं समुद्धृत्य इति मंत्रेणाभि मृश्याप्सु प्रक्षिप्यान्यद्रव्येणान्यां स्रुचं तत्स्थाने नियोज्य आज्येन सर्वं प्राय श्चित्तं चेति॥ ॥ अथाग्निहोत्रद्रव्यमधिश्रितं यदि स्रवेत्॥ ॥ तत्राश्वला यनः॥ अग्निहोत्रं शरद्वाराय त्समोषामुमिति द्वेष्टारमुदाहरेदिति॥ समोषा मुमित्यभिमंत्रणं॥ अमुमित्यस्य स्थाने यजमानोद्वेष्टुर्नाम गृह्णीयात्॥ स ३४

मोषादेवदत्तइति॥ तदभावे समोषापाप्मेति द्रव्यशब्दोत्पत्ति प्रायश्चित्तं॥ ॥ अथविष्यद्दमाने हविषिप्रायश्चित्तं॥ ॥ तत्रोद्वासितस्यविष्यद्दे आहाश्वलाय नः॥ विष्यद्दमानंमहीद्यौः पृथिवीचनइत्याहवनीयस्यभस्मोतेनिनयेदिति॥ तस्यायमर्थः॥ उद्वासितंपयःसाधारणंहविस्तापयत्रेनविष्यद्दते तदामही द्यौः पृथिवीचनइमंयज्ञंमिमिक्षतां॥ पिप्रतान्नोभरीमभिरित्याहवनीय स्यभस्मोतेनिनयेत्॥ अन्येनप्रचरेत्॥ त्रोषेणेतिकेचित्॥ ॥ इत्युद्वासि तद्रव्यविष्यद्दने प्रायश्चित्तं॥ ॥ अथाधिश्रितंपयःसाधारणद्रव्येवाधि

३५ प्यंदतेस्कंदतेवातस्यप्रायश्चित्तं॥ तैत्तिरेयब्राह्मणे॥ तदाहुर्यस्याग्निहोत्रमधि
श्रितेस्कंदतिवाविष्यंदतेवाकातत्रप्रायश्चित्तिरिति तद्ब्रूमोयदग्नेरुपनिनयेज्जंत्वे
शांतिर्वाआपोधेनदक्षिणेनपाणिनाभिमृश्यजपतिदिवंत्वतीयंदेवान्यज्ञो
गात्ततोमाद्रविणमोषंतरिक्षंत्वतीयंपितृन्यज्ञोगात्ततोमाद्रविणमाष्ट
पृथिवींत्वतीयंमनुष्यान्यज्ञोगात्ततोमाद्रविणमाष्टयेयोरोजसास्क
भितारजांसीति वैष्णवारुणीमंचंजपतिविष्णुर्वैयज्ञस्यदुरिष्टंपाति ३५
वरुणस्त्विष्टंतयोरुभयोरेवशांत्याऽऽप्तिः॥ विष्णुवरुणाभ्यामिष्टिः पूर्णा

यमोरोजसास्कभितारजांसिवीर्येभिर्वीरतमाशविष्ठा॥ यापस्थेतेअप्रतीतासहोभिर्विष्णू
अगन्वरुणापूर्वहूतौ॥

कृतिर्वा॥ ॥ इत्यधिश्रितविष्यंदनेसामान्यदुष्यस्कंदनेचप्रायश्चित्तं॥ ॥अथ
केशादिभिर्दुष्टेप्रायश्चित्तं॥ तत्राश्वलायनः॥ सान्नाय्यवल्मीकैः॥ केशादिभि
र्दुष्टेग्निहोत्रे हविर्मात्रेवाप्राजापत्यचरुमध्यमेनपलाशपर्णेनवल्मीकेषु
५ दुष्यादिति॥ सान्नाय्यं वा प्रतिपत्तिरित्यर्थः॥ नचसान्नाय्यस्यवल्मीकवपा
यांवापशुवाप्रतिपत्तेरुक्तत्वात्तेनैवन्याये नान्यापिप्रतिपत्तिरितिदेश
वाक्यादुक्तमितिवाच्यं॥ ततोनिर्देशेनैवापशुप्रक्षेपस्यप्राप्तत्वात्पुनर्वि
धानवैयर्थ्यापत्तेः॥ सूत्रद्वयस्यतुसामान्यविशेषन्यायेनाप्योनरुक्त्यं॥

३६ सामान्यतोदर्विर्मोचस्येवबीभत्सेऽभुप्रक्षेपः॥→अग्निहोत्रहव्यस्यतुक्लीकरं
ति॥यद्वापयसःसान्नाय्यवत्प्रतिपत्तिः॥→अन्यहव्यस्याःप्रुप्रक्षेपइतिकेचित्प्र
तिपत्तौविकल्पमाहुः॥इतिकेशादिभिर्दुष्टेप्रायश्चित्तं॥→अस्यापवादमाह
गोपालः॥पिपीलिकामक्षिकाभिःक्षुद्रकीटैर्नदुष्यति॥तानुद्धृत्याद्भिरभ्यु
क्ष्यतदुत्स्रयतुहूयतइति॥→अग्निहोत्रहव्येवर्षिबिंदुपातेप्रायश्चित्तं॥त्र
ग्निवर्षेमित्रोजनान्यातयतिब्रुवाणइतिसमिदाधानं॥→अग्निहोत्रहव्ये
वर्षिबिंदवश्चेत्पतेतांतितरा॥मित्रोजनान्यातयतिब्रुवाणोमित्रोदाधार ३६

पृथिवीनुतद्यौ॥मित्रःकृष्टीरनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहोत
मा स्वाहेतिनिमित्तानंतरंसमिधंहवनीयेजुहुयादितिसूत्रार्थः॥वृत्तिकृतोभिम
तमेतत्॥→अन्येतुप्राकृतमंत्रमपोह्यानेनमंत्रेणप्राकृतसमिदाधानमा
हुः॥इत्यभिवृष्टप्रायश्चित्तं॥॥→अथोपोढेयद्यनुगतेप्रायश्चित्तंप्रदीपे॥
→अग्निहोत्रहविःपाकार्थंयद्युद्धृतेग्नौअनुगतेयोनितउत्साद्यहोत्रादी
मन्यतमेनप्रायश्चित्तंकुर्यात्॥चतुर्होतारमित्येकेमिदाकृतीत्येके॥या
हूतयइत्येके।मनस्वतीत्येके।इतिबौधायनोक्तेः॥→आश्वलायनस्या

३७ इति होमं कुर्यात्॥ उद्धृतस्याग्नेर्गार्हपत्यस्य नाशेनपश्चतीष्टिं पूर्ववत्॥ त
तोंगारनिर्हरणादि होमशेषं समापयेत्॥ अपीठे वर्त्तमानेगार्हपत्योनु
गच्छेत्॥ अपीठे कृत्वांगार्हपत्ये निधायसर्वप्रायश्चित्तमितिभावः॥ इ
त्यपीठानुगतप्रायश्चित्तं॥ अथोत्तराकृत्यांविस्कंदनादोप्रायश्चित्तं॥ ॥ इ
गोपात्तः॥ ॥ पूर्वाकृतोकृतायांचेत्स्कन्नास्यादुत्तराकृतिः॥ अपिवोत्तर
याकृत्या पूर्वामभिजुहोतिचेत्॥ यत्रवेत्थेत्यृचाधायसमिधं पूर्वपावके
॥ ततएवोपदोहाद्ध तच्छीकृत्योत्तराकृतिं॥ अन्यांदुग्धापुनश्चापिजुहु ३७

याद्अग्निहोत्रकमिति॥ इदमेवयत्रवेत्थवनस्पतइत्युत्तरस्याआकृत्यास्कं
दनइतिब्रुवतआश्वलायनस्याभिमतमित्यनुसंधेयं॥ ॥अत्रेयंप्र
योगः॥ ॥ पूर्वाकृतोकृतायामुत्तराकृत्यर्थं पयस्कंदनेप्रजापतेर्वश्येष्ट
तिपूर्ववत्स्कन्नंपयोग्निमुखयाःस्रुवेप्रक्षिप्य॥ यत्रवेत्थवनस्पतेदेवा
नांगुह्यानामानि॥ तत्रहव्यानिगामयश्चारुतिसमिधमाधायतेनैवौ
शेषेण२ ज्यैनंजुहुयात्॥ अन्यद्ग्नेर्होपपदेतुस्कंदनंसमुद्रंवःप्रहिणोमीतिमं
त्रेणाग्निमुखयास्रुवेस्कंदनंप्रक्षिप्ययत्रवेत्थवनस्पतेतिसमिधमाधाय

३८ शेषेणजुहुयात्॥उभयत्राप्यशौतुपुनरुन्नयनं॥अाज्यमशेषइतिसेयं
॥पूर्वाकृत्यासहैवोत्तराकृत्याःपातेतुयत्रक्वेत्यादिज्ञातव्यं॥पूर्वाकृ
तिंविस्मृत्यैवोत्तराकृतेोकृतायांपूर्वाकृतेरुपरिवेतिचंद्रिकायां॥अय
मर्थः॥॥पूर्वाकृतेोकृतायांयउत्तराकृतिःस्कंदेत्॥पूर्वाकृतेरुपरि
यदुत्तराकृतिःपतेत्॥पूर्वाकृतिंविस्मृत्यैवउत्तराकृतिंजुहुयात्॥सर्व
त्रयत्रक्वेतिसमिधमाधायस्कन्नमभिमंत्र्यशेषेणतूष्णीमुत्तराकृ
तिंजुहुयात्॥निःशेषस्कन्नेकृतेवाग्निरभ्युन्नीययत्रक्वेतिकृत्वापुन ३८

होमांतंकुर्यात्॥अत्रावशिष्टेत्ववशिष्टेनैवतूष्णीमुत्तराकृतिंमात्रापा
चारेपितलेचैलसमानुयादितिन्यायात्॥भक्षणस्यापर्याप्तोलोपए
वेतिस्कन्नप्रायश्चित्तं॥॥अस्यापवादः॥॥सर्वमिदंप्रायश्चित्तंअा
कृतिपरिमाणइत्यस्कंदनएव॥नतन्यूनस्य॥आकृतिपरिमाणंच॥
इवइत्यणंतुस्रुकबिलपूरणमात्रं॥कठिनांतुअंगुष्ठपर्वमात्रं॥तं
तुलानीतमित्यादि॥चंद्रिकायांतुआकृतिपरिमाणान्यूनेस्कंदने
पिस्कन्नानुमंत्रणंकृत्वासर्वंप्रायश्चित्तमित्युक्तं॥प्रदीपेतु॥भस्मन्यग्नौ

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY

३९ हविर्धाने वेद्यांस्तीर्णे चव ऋषि॥ तथाविप्रस्य पाणौ चस्रुक्स्रुवौ नीत्वा
तेइति॥ ॥अथाग्नयायप्रायश्चित्ते॥ ॥अग्निहोत्रउपसन्ने चक्रीवधूः
पुरुषोवाविहारमंतरियात्पाधिकृतिंकुर्यात्॥ ॥प्रागिष्टेर्गार्हपत्यमंतरेणा
तिक्रामयेत्॥ ॥श्वाग्नयायेतुविश्रोषः॥ ॥इदंविष्णुर्विचक्रम इतिमंत्रेणा
गार्हपत्यभस्मनाश्वनःपदंप्रतिपूरयेत्॥ प्रतिपदंमंत्रावृत्तिरिति॥
ततःसर्वत्रतेनुतन्वन्नजसोभानुमन्विहीतिमंत्रावृत्यागार्हपत्यादा
हवनीयपर्यंतंभस्मरेखोल्लेखधारांचकुर्यात्॥ततआहवनीयमनु ३९

गमयित्वापुनःप्रणयनमंत्रेणप्रणीयोपतिष्ठते॥ यदग्नेपूर्वंप्रहितंपदं
हितेसूर्यस्यरश्मिन्यातनाम॥ तत्ररिष्टामनुसंचरेमांसन्नःस्रजसु
मत्यावाजवत्या॥ त्वमग्नेसप्रथाअसिजुष्टोहोतावरेण्यः॥ त्वयायज्ञंवि
तन्वते॥ इतिहाभ्यां॥ ततःप्रक्रांतमग्निहोत्रंसमाप्यतेघेवाग्निषुपाधिकृ
तीकार्या॥ अनुगमनंप्रणयनपक्षएव॥ नाज्यस्रु॥ श्वनोग्नयायेनगामं
तरेणातिक्रमयेदितिदेवजातः॥ अतिक्रामयेदेवैतीतरे॥ यदाकदा
वाग्नीनांग्नयायेपाधिकृत्यवनान्यत्॥ इतरेयद्याससतो॥ तदाकुर्याद्गार्हपत्याद्

वनीयावंतरेणानोवारधोवाश्चावाप्रतिपद्येतकात्रप्रायश्चित्तिरितिनैनमनसि
७० कुर्यादित्याहुरात्मन्यस्यहितामवंतीतितच्चेमनसिकुर्वंतगार्हपत्यादिविच्छिन्नामु
दकधारांहरेत्तंतुंतन्वन्नजसोमानुमचिहीत्याहवनीयादितितत्कर्मकालादन्य
त्रज्ञेयं॥यदाकदाचिदितितत्कर्मारंभोनेरंद्र्योपसादनात्प्रवैदोमोनरंचेति
विवेकः॥सत्रांतरेतु॥पुरुषगोछागमहिषवाराहमृगश्वापदादीनांकर्मम
८ ध्यान्यत्रवन्हीनांमध्येतोगमनेसर्वंप्रायश्चित्तं॥कर्ममध्येतुरुद्रादयोहि
पदमर्कटबिडालखरकाकमृगपशुकीटसरीसृपादीनांवन्हीनामत्यिनो ७०

मध्यतःकर्ममध्येगमनेसतिद्वादशाग्रहीतेनदुर्गामनस्वतीत्याहुतीश्चजुहोति॥अ
नोवारधोवावन्हीनांमध्येतोगछेद्दहवनीयमुद्वाप्यैयदग्नेपूर्वमिति ।त्न प्रणीय
द्वाभ्यां मग्नेसप्रथाअसीतिनमुपस्तायपाथिकृतिंकुर्यात्॥कर्ममध्येचेत्॥अनोवा
रधोवाग्नीनांमध्येतोगछेद्दहवनीयमुद्वाप्यपुनःप्रणीयसर्वंप्रायश्चित्तेकृत्वापा
थिकृतिंकुर्यात्॥अग्नीनांमध्येवाऋत्विगग्निमध्येवाद्विपदानांवाचतुष्पदानां
वागमनेमिंदादिगणः॥द्वादशाग्रहीतेनदुर्गादिगतोवामनस्वतीवाइत्येत
त्कर्ममध्येवेदितव्यं॥अाश्वलायनानांतुचक्रीवदितिपलक्षणंतनःसूत्रांतरो

८१ क्तानामपि गोछागादीनामंतरागमने पाथिकृत्येवनदुर्गादिः॥ तदुक्तंतत्रैतन्निवासिना॥ ॥ॐअग्नीनामंतरालेयदिनोवारथोवाश्वामनुष्यादयोवापशवोवापक्षिणो वासर्पादयोनिर्गछेयुःतत्रपाथिकृतीति॥ॐअग्नीनामल्पोपहतौप्रायश्चित्तं॥ वन्हीनांपरिवीजकादिभिःस्पर्शेसर्वप्रायश्चित्तमिति॥परिवीजकादिस्वरूपंचप्रदीपे॥ यःसोदरेज्येष्ठभ्रातर्यकृतदारेकनीयानुद्वहतिसपरिवीजकः॥ज्येष्ठःपरिवित्तिःकन्यादातापरिविदानंविवाहात्सर्वमपिद्वयंकन्यादीयेतिचोक्तनिश्चयेनयःकन्यांस्वीयांकरोतिसपरिविदान॥ यःसोमंव ८१

---

२ अपज्ञेज्येष्ठेयोयज्ञंकरोतिसपर्यष्टाज्येष्ठःपरीष्टइति।वह्नीनामेकदेशापहारेसर्वप्रायश्चित्तं।२

मतिससोमयामी॥ॐअधोविरिक्त सोमःससोमातिपातिच॥ अक्षेषुक्रमेणयोनमक्षयतिसमक्षोतरितः।यथाविहितं नमक्षयतिसमक्षरहितः॥ॐअथाग्निबहिःपातप्रायश्चित्तं॥ॐअथाश्वलायनः॥ॐआहवनीयमवदीप्यमानमयोकृताभ्यापरासादंतएकंपरऊतएकमितिसंनयेत्॥ ॥ॐअस्यार्थः॥ ॥ॐआहवनीयस्यैकदेशःसमस्तोयायायतनादुत्सृष्यावोकृताभ्यापरासादेदेबहिर्गछेत्तदानमग्निं॥इदंतएकंपरऊतएकंतृतीयेनज्योतिषासंविशस्व॥संवेशनेतच्चेश्वारूरेधिप्रियोदेवानांपरमेजनित्रेइतिमंत्रेणायतंपुनःसंयपेत्॥ औपश्चेन्मे

ने

४२ श्चायश्चित्तिः॥ ॥ ततआज्यंसंस्कृत्यसमस्तव्याहृतिभिः सर्वंप्रायश्चित्तंजुहुयात्॥स
त्रेदीप्यमानवचनंयावत्प्रायश्चित्तकालंजीवतएवेतत्॥ नविस्मृतिंगमाच्च
इतिस्रापनार्घमितिवत्तिकृत्॥ऋसंबंधेसत्येवेतिसिद्धांतभाष्यकृत्॥स्त्री
र्णबर्हिषोबहिर्गतेग्नौप्रायश्चित्तप्रापणार्घमितिदेवयज्ञातः॥कृत्स्नाग्नेर्बहिः
पातएवेतत्प्रायश्चित्तमितिहरदत्तः॥अग्नेस्तरबहिःपाते तूष्णींप्रक्षि
प्यसर्वंप्रायश्चित्तं॥ ॥इदमेवदर्शपूर्णमासादावपिज्ञेयं॥ज्याप्यरा
सादूर्ध्वमाहवनीयगमनेतुपाधिकृतीष्टिः॥यदित्वतीयादितिसत्येतु ४२

ज्ञाद्यप्रक्षेपोमंत्रनिरुत्यर्थः॥तेनज्याप्यरासोर्ध्वगमनेतूष्णींमायतनेप्रक्षिप्य
पाधिकृतीष्टिःइदंकर्मलोबहिः॥दर्शहोममध्येचेत्प्रकृतेकर्मसमाप्येष्टिः॥
तंत्र इष्टिमध्येचेत्तदैवमुपजीव्यपाधिकृतीतिवत्तिकृत्॥प्रकृतेष्टिंसमाप्येतिदे
वज्ञातसिद्धांतभाष्यकृतो॥अभियुक्तास्तुसमिष्टयजुषःपूर्वंनिमित्तेतदा
नीमेव॥तदूर्ध्वंनिमित्तेतुप्रकृतेकर्मसमाप्यैवेतिमधुरस्वामाहुः॥पाधिकृ
त्यामग्निःपधिकृद्देवता॥अष्टाकपालःपौर्णमासंतंत्रं॥प्रधानमुपांशु॥
वेथाहिवेधोअध्वनःपथश्चदेवांजसा॥अग्नेयत्तेपुसुकृतोऽऊंयेऽहे

८३ ॥अग्निंपथिकृतं॥आदेवानामपिपंथामगन्मयछन्नेवामतदनुप्रवोढुं॥॥अग्नि
र्विद्वान्त्सयजात्त्सेदुहोतासोअध्वरात्स्रुतन्कल्पयातीवो३॰॥ ॥अग्नेःपथि
कृतोर्॰मन्त्रादः॥ ॥अनङ्वान्दक्षिणापुनरालंभवर्जंसंतिष्ठते॥ ॥अथहोम
कालातिपत्तिप्रायश्चित्तं॥ ॥प्रदोषांतोहोमकालःसंगवांतःप्रातरिति॥ ॥
प्रदोषोरात्रेःपूर्वेचतुर्थभागः॥ ॥ समाप्तेयस्य॥नवघटिकाइति
यावत्॥केश्चित्तंचमीषष्ठ्योनाडिकेप्रदोषउक्तेनोच्यते॥तदंतोहोमका ८३
लइतिवक्तिकृत्॥संगवःपंचधाविभक्तस्याद्द्वितीयभागः॥एवंविंश

द्वा
मानेनद्वादशघटिकादिवसस्यतृतीयोभागइतिकेचित्॥तदाघटिकादिवसस्यद्वि
तीयोयामइतिदेवयज्वानोक्तिरुक्तभागाभिप्रायेणेतिबोध्यं॥सिद्धांतभाष्येतुदिवसस्य
चतुर्थोभागःसंगवइत्युक्तं॥तत्रसार्धसप्तघटिकाःकालः॥एवंप्रदोषसंगवका
लयोरपिक्रियमाणोहोमेनप्रायश्चित्तं॥तदतिरिक्तेतुप्रायश्चित्तंभवति॥प्रायश्चि
त्ताहोमेगोएकालमाहबोधायनः॥सायंहोमस्यसर्वोनिशा॥प्रातर्होमस्यसर्वम
हरितिताद्दशेगोएकालेजुहुतःप्रायश्चित्तमाहाश्वलायनः॥ तम
तिनीयचतुर्थेतमाज्यंजुहुयात्॥तंप्रदोषंसंगवमित्यर्थः॥होममंत्रव्यवस्था

ही १

यदिप्रातः।

४४ माह॥ यदिसायंदोषावस्तर्नमःस्वाहेत्यग्नौप्रात र्वस्तर्नमःस्वाहेति॥क
र्त्तेत्यंतरमाह॥ ॥अग्निहोत्रमुपसाद्यस्रुचौसंमृज्यःस्वरितिजपित्वावरंदत्वाजुहु
यादिदिश्यवारुणी कृत्वाप्रातर्वरदानमनुगमयित्वाहवनीयंपुनःप्रणीये चा
मुंमा दिहैवक्ष्येम्यधिमाप्रहासीरमुंमामुष्यायणमिति ततइष्टिमित्रःस्त्रयो
क्षियोमहिनादिवंप्रसमर्तोअस्तुप्रयस्वानितिसंस्थितायांपत्न्यासहया
ग्यतोग्नीनुज्वलतोहरन्अनुपासीतेति॥ ॥अस्यार्थः॥ ॥अग्निषुकाल
प्रणीतेषुहोमस्योक्तकालातिपत्तौगार्हपत्येआज्यंसंस्कृत्यजुहुयात्॥ ४४

जुह्वांचतुर्गृहीतंगृहीत्वासायंकालातिपत्तौदोषावस्तर्नमःस्वाहेत्याहवनीये ९

अग्निर्देवता॥ ततःसायंहोममुपक्रम्योपसादनांतंकृत्वाकर्त्तोभ्रुवःस्वरिति
जपेत्॥ यजमानोवरंदद्यात्॥ ततःकर्त्तासमिदाधानादिसर्वंसमापयेत्॥ तत
स्तेघेवाग्निषुतदानीमेवावारुणींकुर्यात्॥ प्रातस्तुचंचतुर्गृहीतांतेसमानंहोमे।
प्रातर्वस्तर्नमःस्वाहेतिविशेषः॥ अत्राप्यग्निर्देवता॥ ततउपसादनांतंकृत्वाभ्रु
वःस्वरितिजपित्वाजुहुयात्॥ वृष्टिरसिऊर्ध्वमेत्यंतेवरदानंततःशेषंसमा
प्य॥ आहवनीयमनुगमयित्वापुनस्तमेवेद्धरेत्॥ इहैवक्ष्येम्यधिमाप्रहासी
रमुंमामुष्यायणमिति॥ यथास्नानमंत्रेणेतिदेवताः॥ वृत्तिरूदमुमित्य

देवदत्तंभारद्वाजायगणमिति।यदिपितानजीवतितदाभारद्वाजमिति।तदादेवदत्त॰
स्थाने।

४५ स्यौद्वितीयांतंयजमाननाम।अमुष्यायणस्थानेयजमानस्यपितुर्नामनिर्दि
शेत्॥यदिपिताजीवतितर्हीभारद्वाजमितिभिर्हशेदित्याह॥एवमनुगम्याह
वनीयंपुनःप्रणयेद्दक्षिणाग्निंसएव॥ततस्तेवैयाग्निपुमित्रमर्यदेवता
कापूर्वोक्तेष्टिःकर्त्तव्या॥तस्यांचेष्टौसंस्थितायांतानेवाग्नीन्यन्तीयजमानो
वाग्यतावनश्नंतोज्वलयंतावुपासीतां॥ततोद्वयोर्युग्धेनरात्रिपूर्वंचतुर्थ
भागेग्निहोत्रंकुर्युःएकस्याःपयोधिश्रित्यतत्रद्वितीयमानयेदितिशेषः॥ वि-४५
तेनपयसाहोमः॥ततस्तोदक्षिणाग्न्याहवनीयौपरित्यजेत्॥सापूर्वमेवोक्ता

१श्वोभूतेयथाविधिप्रातरग्निहोत्रंहुत्वापुनरग्नीनिष्ट्यर्थंप्रणीयव्रातभृत्यायजेत।१

एतदुक्तप्रायश्चित्तेस्वकालएवप्रणीतेष्वग्निषुहोमकालातिपत्तौभवति॥अ
प्रणीतेषुक्तकालातिपत्तौअत्यंनापदिअनुद्धृतप्रायश्चित्तंकृत्वाहोमंकुर्या
त्कालातिपत्तिप्रायश्चित्तं॥अनापदित्वप्रणीतेषुकालातिपत्तौआहवनी
यमात्रंप्रणीयस्मार्त्तेवदाज्यंसंस्कृत्यस्रुवाहुतिमाहवनीयेजुहुयात्॥म
नोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु॥विश्वेदेवासोयाज्ञ
निष्टास्तःसंतनोमिहविषाघृतेनस्वाहा॥तमाहवनीयंपरित्यज्यानुद्र
व्यप्रायश्चित्तसहितोहोमः कार्यः॥ ॥सायंविद्धेग्निषुअकृत

४६ होमस्य होमांतरकालप्राप्तौ कालातिपत्तिप्रायश्चित्तसहितं सायं होमं समा
प्यानुद्रवणप्रायश्चित्तसहितं प्रातर्होमं कुर्यात्॥ प्रातर्विहतेष्वग्निषु तादृग्
सायंकालप्राप्तौ कालातिपत्तिप्रायश्चित्तसहितं प्रातर्होममुपक्रम्यत
त्रैयानुगमनपूर्वकं पुनः प्रणीतासंपादनीये पूर्वप्रणीतदक्षिणाग्नौ च द्व
योर्दुग्धेन सायं होमानंतरं तदर्थमनुद्रवणप्रायश्चित्तमात्रं॥ अथापि
दितुमनुमतीसहितं प्रायश्चित्तं कृत्वा सायं होमविधायानुद्रवणप्राय
श्चित्तसहितं प्रातर्होमः॥ अविहृतेषु प्रातर्होमस्य सायंकालपर्यंतम ४६

३ मुद्रवणंवा।अविहृतेषुसायंहोमस्यप्रातःकालपर्यंतंउत्कर्षेआपदिअनुद्रवणप्रायश्चित्त ३

त्कर्षे तदर्थे कापद्यनापदि वानुद्रवणप्रायश्चित्तसहितं प्रातर्होममुपक्रम्यतद
र्थं वाग्निषु वसायं होमांतं नं तुतदुद्रवणप्रायश्चित्तं॥ सायं होमार्थं विहृतेष
ग्निषुद्वितीयसायंका लपर्यंतंउत्कर्षे कालातिपत्तिप्रायश्चित्तसहितंसा
यं होमंसमाप्यानुद्रवणप्रातर्होममुपक्रम्यतदर्थं वाग्निषुसायं हो
मांतं॥ प्रातर्होमार्थं विहृतेष्वग्निषुद्वितीयप्रातर्होममुत्कर्षेकालातिपत्ति पर्यंत
प्रायश्चित्तसहितं प्रातरग्निहोत्रमुपक्रम्यद्वयोर्दुग्धेनसायं होमांतं कृत्वा
तावग्नीपरित्यज्यानुद्रवणप्रायश्चित्तसहितं प्रातर्होममुपक्रम्यतदर्थं

घेवाग्निष्वात्तभृतीष्वानुद्धरणप्रायश्चित्तंसमापयेत्॥ एवंविहुतेसायंहोम
८१ स्यद्वितीयसायंकालपर्यंतंमुत्कर्षेप्रातर्होमस्यद्वितीयप्रातःकालपर्यंतंउ
त्कर्षेणोत्यं॥ ॥अत्यापदिएकस्यदयोःवेहूनामपिविच्छेदेनानुद्धरणप्रा
यश्चित्तं॥ किंतुमनस्त्येवेत्याचार्यः॥ अग्निहोत्राहोमेचेति॥ अग्निहोत्र
होमाभावेपिमनस्तीकार्येत्यर्थः॥ ॥तांकृत्वापक्षहोमविधानेनअ
ग्निहोमंचकुर्यात्॥ ॥तदाहपरमनत्वेनअग्निहोममेकेइति॥ ॥बौधा
यनस्मृ॥ ॥सायंदोहिपत्नीसायंदोषादिकेनतंतु॥ होश्चतुर्गृहीतेनमन ८१
चम
मा

हा२

स्त्यायायाप्सवेत्॥ प्रातर्दोषादिमंचःस्यात्प्रातर्यज्ञमनस्त्यी॥ कृत्वात्तीतं
या ततःप्रातंतुजुहुयादग्निहोत्रकं॥ एकाग्निहोत्राणामतिपत्तिर्पवेद्यदि॥ दृषि
रष्टकपालेनकार्यातंतुमतेग्नये॥ अतीतानांचसर्वेषांप्रतिहोमोप्सवेत्त
सा दा॥ अर्वाक्कृष्णमासतश्चेद्वर्षण्मासादिनिगद्यते॥ प्रोषितेयजमानेतुहोमश्चे
त्प्रभवेद्यदि॥ मनस्त्यीतंतुमतीप्रतिहोममितिस्थितिः॥ एवंदीक्षितेषुचि
त्तिःस्यादग्निहोत्रातिपातने॥ समारूढेषुशुच्याद्याःक्रमादिष्टयईरिताः॥
श्व शुचिश्चपावमानेतंतुमानयपाथिकृतइति॥ दीक्षनवनेस्कृष्णमासानग्नि

४८ दोत्रातिपातने॥ इष्टिश्चतुर्हविःकार्यो नस्याद्वा रक्तदेवताःपथि
कृत्तेतुमान्त्रोनपतिर्वैश्वानरस्तथा॥ अग्निर्व्रतपतिश्चेभ्यःपुरोडाशा
स्तुनिर्वपेत्॥ अग्निर्वैश्वानरश्चैकःस्याद्वादशकपालकः॥ इतरेदाक
सु पात्रैरन्वाहार्यस्तदक्षिणा॥ ततोनीनिसंख्यायकृत्वाप्राशंजुहोतिच॥
सं अग्नियोत्राणिजुष्येरन्यदिवत्सरंतदा॥ इष्टिःसप्तहविष्कास्याद्देवताः
क्रमशस्त्विमाः॥ पवमानोग्निःपूर्वश्चपावकश्चशुचिस्तथा॥ पथिकृ
त्तेतुमान्त्रोनपतिर्वैश्वानरस्तथा॥ स्याद्वादशकपालःस्यादन्वाहार्य ४८

ता स्तदक्षिणा॥ ततोनीनिसंख्यायकृत्वाप्राशंजुहोतिच॥ तदूर्ध्वंपुनराधेयंयदि
धेयमग्निनाशनात्॥ इतिकालातिपत्तिप्रायश्चित्तं॥ ॥अथाग्निहोत्रसमा
सः॥ ॥बौधायनः॥ ॥अथापद्यग्निहोत्राणांसमासोराष्ट्रविप्लवेव्या
धिपीडायामध्वगमनप्रसंगेगुरुकुलवासापेक्षायांमातृपितृकुलत्रा
ण्यपेक्षयेबलवतानिरोधादौदेशकालद्रव्यानुपपत्तौचात्यंतापत्तिषु॥
पक्षहोमविधिश्चास्मत्कृतेदर्शप्रयोगेद्रष्टव्यः॥ अथानापदिपक्षतो
मे प्रायश्चित्तं॥ यज्ञार्थे॥ अनातुरोप्रयार्म्यानिश्चितोनिरुपद्रवःपु

८९ क्षहोमंकृत्वोदद्यात्सरेप्रतिव्रतमिति॥ गोपालः॥ नेच्छामितयाकार्यंन
रोगान्मचलोमतः॥ नेतच्छक्तिंदधानस्तुकुर्याच्छ्रद्धातुरापदि॥ अनापद्यु च
रन्निष्ठातंतुमत्यामजेतसइति॥ पक्षहोमेकृतेम्रियमाणेग्नेरनुगतेमं
थनारंभात्पागस्तादेपुनराधानंप्रतिनिध्यभावात्॥ होमस्यावधिमाहमं
उनः॥ तृतीयेनंतरेपक्षेसमासंनसमाचरेत्॥
आपच्चैवनुवर्त्तेतदीर्घकालंकथंचन॥ यावज्जीवमवि ८९
छिन्नान्पक्षहोमान्समाचरेत्॥ आपदेवावधि स्तत्रनपक्षगणनाये

धिरिति॥ ॥ अथाग्निसमारोपः॥ ॥ सचद्विविधः॥ अरणीसमारोपः॥
पाणिसमारोपश्च॥ तत्रारणीसमारोपे॥ ॥ अयंतेयोनिर्ऋत्वियोयतोजातो
अरोचथाः॥ तेजानन्नग्नआसीदाधानोवर्द्धयागिरइतिस्वस्त्रपठितमं
त्रपाठादेवसमारोपसिद्धिः॥ तथाचसमारोपमन्त्रमेपोपेक्षितानांअ
ग्नीनामनुगमेनुगतप्रायश्चित्तविधिनाग्नयउत्पाद्याः॥ नप्रत्यवरोहवि
ने धिना॥ अन्यथोत्पादेपुनराधानं॥ यथाविधिसमारोपेकृतेपिअविहि
तमंथनेनाग्निसिद्धिः॥ तदामंथनोत्तरमप्यग्निंपरित्यज्यपुनस्तद्विधिनो

अन्वाहितानांअविधिनासमारोपितानांअनुगमोत्तरंउदपात्लादावपिपुनरन्वाहृतस्थलेपुनराधा
नमेवेतिगुरुचरणाः।अन्वाहितगार्हपत्यमात्रस्यसमारोपपक्षमेणोपेक्षितस्यअनुगमनोत्तरंउदपा

५० कार्यंक्षमात्तस्मिन्नग्नौचतुरात्रं हूयमानेपुनराधानं॥यद्यविधिनामधि
नाग्निष्वेवजुहोतिचतुरात्रात्पुनराधानं॥समारोपपक्षमेपेवमेवमंथनोत्पा
दितेग्नौचतुरात्रमग्निहोत्रेहूयमानेभवत्येवतत्॥पक्षहोमादिविधि
कृतेषु नाग्निहोत्रहोमेषुसमारोपपक्षेमेपमंथनोत्पादितेग्नौनपुनराधानं॥
सत्यपिचतुरात्रातिक्रमेविहितमंत्रायंगोपेमंथनेनत्यवरूढेग्नौ त
य आँतनपक्षेपात्सवमनुगतेःरणीस्थक्ष्मनाःरणीसंस्पृश्यइतोजात
इतिमंथनंकृत्वागार्हपत्यायतनेग्निंनिधायतपस्वतीष्टिंपूर्णाहुतिं ५०

यानुयोत्॥ ॥सचैत्रमंथनानिमित्तंप्रायश्चित्तेसमस्तव्याहृतयः॥नम
स्वतीतिकेचित्॥ ॥अथपाणिसमारोपः॥ ॥अयंतइत्यस्यस्थाने
॥यातेअग्नेयज्ञियानन्नस्तयेत्यारोहोन्मान मछावसूनिरूपन्त त्मा
र्मीपुरुषि यज्ञोभूत्वायज्ञमासीद योनिंजातवेदोभुवआजायमा
नः॥इतिस्त्रोक्तमंत्रंपठन्नाख्यांतरमंत्रपाठेनसमारोपसिद्धिः॥तत्रा
पिप्रायश्चित्तंपूर्ववदेव॥ ॥विधिविहितपाणिसमारोपेपिअकरोहण
कालेयावदग्निर्जनमतावदरणीसंस्पृश्यान्नेवास्तइत्यादिविधिलोपेपूर्व

५१ वत्सायश्चित्तं॥ पाणिसमारोपोन्नरंविहितधर्मायथा॥ जले मज्जनंस्नाया
न्नोपेयाच्चस्त्रियंतथा॥ कृत्वामूत्रपुरीषेतुचिरंन्यासीशुचिरित्पारयः॥ न तचा
क्षोपेग्नयोनश्यंतितत्रपुनराधेयमेवप्रायश्चित्तिः॥ ॥इत्यरण्यीसमारो
पपाणिसमारोपयोःप्रायश्चित्तं॥ ॥अथसमारूढेघरण्यीनाशेप्राय
श्चित्तं॥ ॥तत्राऽरण्यीनाशस्त्रिविधः॥ ॥अमेध्यादिनोपहतिः॥स्वरू
पनाशः॥ ॥कार्योक्षमत्वेचेति॥॥तत्रप्रथमपक्षेबोधायनः॥ ॥अष्ट
भिर्निमित्तैर्विनश्यत्यग्निरध्यश्चचांडालश्वदायसपतितशवसम्पर्क ५१

रुहदोषापदाराग्निलक्षणःप्रणाशश्चतुर्विधः।२

स्वाग्निश्चसंसर्गेरण्योर्विनाशस्तयोरुत्सर्गस्तत्समयेनचेत्र्यन्येऽरणी
भ्यामानीयाग्न्याधेयमिति॥अमेध्यान्याहगोपालः॥अमेध्यारक्तविट्मूत्र
रेतःश्लेष्माश्रुदूषिकाः॥मानुषास्थिशवस्वेदमद्यान्तैर्वसादयइति॥चांडा
लयहणंसर्वप्रतिलोमोपलक्षणं। उदक्याग्रहणेनेहगण्यतेसूतिका
पिचेतियत्रपार्श्वे॥सप्तभिःपंचभिर्वात्रिभिर्वावेष्टनैर्युता॥अरण्यीनत्र
समा दुष्येत्पतितादिगमनेइति॥ ॥वेष्टनद्रव्याण्याहगौतमः॥अजिनंकंबलंद
र्भागोवेशाःक्षौममेववच॥भूर्जपत्रंतालपत्रंसतथावेष्टनंस्मृतमितिस्वरू

५२ रा पनाद्योतु॥ दाक्षयविनाशाद्यैर्विपद्येतांयदारणी॥ तदाग्नयोविश्वास्युस्तत्रा न
ग्न्याधानमिष्यते॥ तृतीयेतु॥ अधरारण्याः कार्यक्षमत्वमुत्तरारण्याकुप्यो
वैतित्रयः पक्षाः॥ तत्र प्रथमपक्षेउत्तरारण्यर्द्ध अधरारणीं कृत्वा मंथनं॥ द्वि
तीयेतर्द्धनउभयोस्तथात्वेद्यग्न्याधेयं॥ तत्र पूर्वारण्यो रुत्से धायामधिस्तारजा
त्याद्यैः समेअन्येसंपाद्यकार्येमिति प्रदीपादयः॥ यत्तिकृत्तु समारूढारण्यो
रन्यतरनाशेपिपुनराधानमेवेति॥ पक्षत्रयेप्यग्न्याधेयंवेत्याहुः॥ गोपा
लोपि॥ अथचेत्स्युः समारूढयन्नेर्व्यापत्तिर्हेतवः॥ तदास्यापुनराधानंय ५२

दारण्योरितिश्रुतेरिति॥ उपहतारण्योः॥ भवतंनः समनसोसमोकमावरेषसो॥
मायस्करिंमिषंमायस्पतिंजानतेदसोद्विषोभवतमयनइत्यनुप्रक्षेपः॥॥
कार्यक्षमत्वेत्वग्नाविनिविशेषः॥ नातद्व्यो॥ अपचारण्योरशक्तिविषयेः
नुग्रहउक्तः॥ अरोपितानुत्तरारणी प्रणाश्याधानमाधस्यतुलौकिका
ग्नौ॥ उपावरोह्यप्रहरेच्चजीर्णेआरोप्यमंथेच्चनयारणीभ्यामिति॥ अयम
त्रक्रमः॥ समारूढमग्निंउपावरोहमितिमंत्रेणलौकिकाग्नावुपावरुह्य
तस्मिन्जीर्णारणीप्रक्षिप्यतस्मिन्नग्नौनवेअरणी॥ अरण्योर्निहितोजा

५३ नवेदागर्भइवसुधितोगर्भिणीषु॥ दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्ये
भिरग्निरितिमंत्रेणसमारोप्यमथित्वाउपावरोहतिनिवर्त्तमानजपंकृत्वा
गार्हपत्यायतनेनिदध्यात्॥ इदमेवात्रपुनराधानमिति॥ अथंन्यायोस्मा
कमनुग्राहकोभविष्यति॥ असमारूढाग्नेररण्युपघातेऽग्नीन्मंत्ररहितः
पालयेत्॥ नवेऽरणीसंपादयेज्जीर्णेपूर्ववत्तत्रक्षिपेत्॥ नवेसमारो
प्यतंतुमतीकुर्यात्॥ तदाहगोपालः॥ एतेःस्पष्टेविनश्यतामरणीतेप
रित्यजेत्॥ अमावास्यातिथावन्येनवेन्याहृत्यपूर्ववत्॥ एवंतन्नइति ५३

प्रास्येन्नरेऽग्नेस्वरणीउमे॥ श्योम्रतेदार्शिकेनेष्वासमारोपादिपूर्वकं॥ पूर्ववं
तंतुमत्यंतंप्रायश्चित्तंसमाचरेदिति॥ अन्यतरनाशेपूर्ववत्॥ अरण्योरुपहृ
तावग्नयोनुगतास्युश्चेत्पुनराधानं॥ दाहक्षयविनाशाद्येरापद्येतांयदारणी॥॥
तदाग्नयोविनष्टाश्चेत्तत्राग्न्याधानमिष्यतइतिवचनात्॥ विद्यमानेघग्निपुय
रणीकार्यांक्षमेस्यातांतदानवेसंपाद्यामावास्येनेष्ट्वाजीर्णेशकलीकृ
त्यगार्हपत्येप्रक्षिप्यनवेऽादायाग्नेरुपरिधारयन्॥ उद्बुध्यस्वाग्नेप्रतिजा
गृह्यांयोनिमन्यांवोढवेजातवेदः॥ अरण्यारणीमनुसंक्रमस्वजीर्णांतनुम

जीर्णो यानिर्णुदस्वेति॥ ॥अथाश्वलायनपरिशिष्टे॥ ॥अरण्यार्नेष्टयोर्वा
५४ विक्षीणयोर्दग्धयोस्तथा॥अग्निश्चेध्रियते यत्र कर्यं तत्र भवेच्छुचिः॥उत्तिष्ठा
ग्ने प्रविशस्वस्वं योनिं यथायथ मा विशादेवयज्यायै तान वेदः॥अरण्यो
र्योनेऽग्निमुत्पन्न इति॥अयंते योनिर्ऋत्वियइत्यरण्योरग्नीन्समारोप्य मंथना
दग्निं प्रत्यवरोहेति मंत्रेण मथित्वाज्ञानमग्निं गार्हपत्येनिधायाग्नीन्प्रणीया
ज्यं संस्कृत्याहवनीयेजुहोति॥मनोज्योतिरिति बौधायनः॥ततस्तंतुमत्यादु
र्णादुत्वावसमापयेत्॥इष्टिपक्षेऽरावंदक्षिणा॥एकभोजनपर्याप्तमन्ने ५४

नारान्मुच्यते॥एवंस्वरूपतोनाशोऽकल्पीकरणंसर्ववदेव॥यदितुक्रतुमध्ये
जीर्णेऽपहृतेवाऽस्यात्तंतदानीमेवान्येनवेत्याहृत्यउपहृतेवेदमुपक्षिप्यजी
र्णंचेदग्नेरकल्पीकृत्यनिक्षिपेदित्यादिंतुमत्यंतंकुर्यात्॥अन्यतरनाशेप्र
र्ववत्॥इध्मेतु॥अपहृताग्नेर्नष्टारण्यीकरण्येतिसूत्रे॥ज्ञानाकरणाद्धस्माद्ध
बौधायनः॥कामंनष्टेषुचापहृतेषुनाग्निषुनाहीयतात्मावेदमाधानमभू
तियजमानएवाग्नयोभवंतिनस्यप्राणोगार्हपत्योवानोन्वाहार्यपचनोव्यान
आहवनीयःकाममुपावरोत्यजुहुयादिति॥कर्मांतेतु॥अथापहृताग्नेर्नष्टा

५५ रणीकस्य ब्रह्मोदनेनैव प्रतिपद्यतेसिद्धमन्याधेयमिति॥चाषोममारोपयेकू
तेयजमानव्यापत्तौतत्प्राणिनान्यारभ्यमंथनादिसर्वंकुर्यात॥तादृशस्यतत्रो
किकाग्निदाहः॥तदातदस्थिभिरन्यारभ्यारणीमंथनेनाग्निंसंपाद्याग्न्यंतर
संसर्गनिमित्तामहिंकृत्वास्थिघ्नसंस्कारांतंकुर्यात॥अस्थ्नामप्यभावे
प्रेताधानंपत्नीदाविधिश्च॥अरणीनाद्रोप्येवं॥॥अथतंतुमन्याःप्रयोगः॥
ये अग्नेतंतुमतेष्टकपालः॥योर्णामासंतंत्रे॥तंतुतन्वन्रजसोभानुमन्विहि॥
ॐ॥ये३० हेअग्निंतंतुमंतन्वक्षानहोनयतनोतसोम्याइषूणुध्वंरशनाग्रो ५५

तपिंशत॥अष्टावंधुरंवहतामितोरथंयेनदक्षसोअनयन्नभिश्रियं॥वो०यथा
नमुपांशु॥अग्नेस्तंतुमतोहं०नादःपुनरास्तंनवर्त्मसंभवत॥अथाग्नु
पघातप्रायश्चित्तमाहगोभिलः॥॥अग्निंरजस्वलाचेत्स्त्रीसंस्पृशेदाघारांतेजुहुयात्॥
इडिरेष्टकपालेनकार्यातंतुमतेग्नये॥चंद्रोऽपतितोदक्यासतिकाकृष्णपादि
भिः॥संसर्गेग्निवि नाशःस्यादाधानमितिकेचनेति॥संसर्गेग्निसंसर्गेणपुन
राधानमितिविवेकः॥ज्ञानाज्ञानकृताग्नवस्थेत्यन्ये॥उक्तंचमहाभारते॥
रजस्वलाचेच्छ्रोताग्निमज्ञानात्स्पृशेतयदि॥इडिरेष्टकपालेनतस्याशुचये

५६ ग्नयइति॥साक्षात्सरंपरास्रुवेविषमिति युक्तंप्रतिभाति॥शु चीऽग्नेः शु
चि॰॥उदग्नेशुचयस्तवेतिपुरोनुवाक्यायाज्ये॥अग्नेःशुचे॰नादः॥यदिक्षु
द्रोपघातःस्या दग्नीनांतत्रतन्नतु॥पुनस्त्वेतिसमिधानंपुनस्त्वेतिस्रुवाहुतिः॥
उभयोःसमुच्चयः॥अथयद्यग्नयोमनुष्याणांदादशमलेःश्वमार्जारमर्क
टनकुलविण्मूत्रैःस्रुक्स्रुवावाज्यावाशुचिजातावशुचिप्रतिषा॰अशुचि
स्रुवेनवोपहन्यैरन्पुनस्त्वेत्युपहृतमग्निमुपसमिध्याहवनीयेसर्वंप्रायश्चि
त्तंजुहुयादितिकेचित्॥॰अ मेध्याधानेसमारोप्याग्निंमथित्वापावमाने ५६

शिरसिनवौधायनः॥ ॥मलाश्च॥ ॥वसाशुक्रमस्रुक्मज्जामूत्रविट्कर्णविण्
नखा॥श्लेष्माश्रुदूषिकास्वेदोदादशैतेमलाइति॥ ॥मूत्रविट्रक्तशुक्राद्यैःसं
सर्गश्चेदमेध्यकैः॥समारोप्यमथित्वेष्टिःपवमान्यत्रदेवतो॥पवमानोग्नि
र्वःस्यात्पावकश्चशुचिस्तथेति॥चांडालस्त्रैचौधानमिति केशवः॥मूत्र पतितस्त्रैं
स्त्रैंशव क्षुपैंस्त्रैंचैवमितिकेचित्॥सर्वत्रोपसमिंधनमेवेत्यन्ये॥क्षामायागारदा
हे॥वैतानिकाग्निभिरागारदाहेऽग्नयेक्षामायाष्टाकपालंद्व्यकेष्टिःकर्त्त
व्येत्यर्थः॥वैतानिकाग्निनागारदाहेनिमित्तेक्षामेष्ट्वायक्ष्यइतिसंकल्पंकुर्या

तू॥ अग्नेत्वमस्मद्युयोध्यमीवा अनग्नि ता अभ्यमंत कृष्टीः॥ पुनरस्मभ्यंसु
५७ विताय देवक्षांविश्वेभिरमतेभिर्यजत्रा॥ ७०॥ ये ३० हैँ अ॑ग्ने ददग्नि स्तनयन्नि अग्निक्षामवंतं
वघोः क्षामारेरिहदीरुपः समंजन्॥ सयोजस्तानोविहीनिद्यो अग्न दारोदसी
भानुनाभात्यंतः॥ वो०॥ अग्नेः क्षामवतोन्नादः॥ शुचयेसंसज्जेनग्निनाग्नेन
शावाग्निनेति वक्तिकृत्॥ यस्याग्नयः शावाग्निनासंसृज्येरँस्सोग्नये शुचये र
ष्टाकपालंपुरोडाशंनिर्वपेदिति श्रोत्सपो॥ श्रोतावाग्निनाशावाग्निनासंस
र्जनिमित्तशुचयेष्टायक्ष्यतिसंकल्पः॥ याज्यानुवाक्यादिपूर्ववत्॥ मिथ ५७

श्चेद्विविचये॥ गार्हपत्यादयःसर्वेग्नयोहोवापरस्परंयदिसंसृज्येरन्तदाविवि
चेष्टिः कर्त्तव्येत्यर्थः॥ याज्यानुवाक्यादिपूर्ववत्॥ गार्हपत्याहवनीययोर्वीति
ये॥ पूर्वपवादोयं॥ गार्हपत्याहवनीयोमिथःसंसृज्येयातांअग्नयेवीतयेइ
ष्टिःकार्येत्यर्थः॥ वीतयेइष्ट्वायक्ष्यइतिसंकल्पः॥ अष्टाकपालोद्रव्यं॥ अग्न
आयाहिवीतयेगृणानोहव्यदातये॥ निहोतासत्सिबर्हिषि॥ ७०॥ ये ३० हैअ
ग्निंवीतिंयोअग्निंदेववीतयेहविष्मांआविवासति॥ तस्मेपावकमर्चय॥
वो०॥ अग्नेर्वीतिरहमन्नादः॥ ग्राम्येणसंवर्गायग्राम्यःपचताग्निः॥ सं

५८ वर्गेष्ट्यायस्य इति संकुस्या॰ अग्नयेसंवर्गायपाकपालः॥कुविन्नोगविष्टये
ग्नेसंवेषिषोरयिं॥उरुरुदुरुणस्कृधि॥ॐ॥ये३॰ हेअग्निंसंवर्गंनाथोअस्मि
सं मसाधनेपरावग्भीरमद्यथा॥संवर्गंरयिंजया३वो॰अग्नेःसंवर्गस्याहम
न्नादः॥येघृतेनाग्निनासंसर्गेअग्नयेक्षुमतेछिः॥अग्निरक्षुमान्देवता॥
अश्वग्नेसधिष्टवसोपधीरनुरुध्यसे॥गर्भेसंजायसेपुनः॥ॐ॥ये३ हेअ
ग्निमक्षुमंतंयग्नेदिधिजाअस्यक्षुजायासहस्कृत॥संवर्गंसंरयिंजया
वो३॰॥अग्नेरक्षुमतोहमन्नादः॥जातकाग्निनाश्रोताग्निनासंसर्गेअ ५८

ग्नयेसंकुसुकायापाकपालः॥संकुसुकेविकुसुकोविकिकिरोयश्चविष्किरः॥नो
पाज्येननलेध्मेनऋग्भिर्दशमयामसि॥ॐ॥ये३ हेअग्निंसंकुसुकंअस्मिन्व
यंसंकुसुकेनाग्नेरिध्मप्रव्रज्महे॥अक्रमयत्रियाःशुद्धाःप्रणआयूंषि
तारिषत्॥वो३॰॥यस्याग्नयोन्येरग्निभिःसंस्रज्येरन्नग्नयेक्षामवतेपाकपा
त्रंनिर्वपेत्॥अक्रंददग्निःस्तनयंतः॥ॐ॥ये३ हेअथायथानःपितरःपरा॰ अग्निंक्षामवंतं
अरुणीरपव्रन्॥वो३॰यस्याग्नयअारण्येनाग्निनासंदह्येरन्नमेयारो
पयेदरणीवोन्मुकंयामोक्षयेयद्याहवनीयाद्यदिगार्हपत्याद्यदिनकुर्या

४ अग्नेःसंकुसुकस्याहं॰न्नादः॥४

५५ स्रोग्नये संवर्गायाज्ञाकपालेनिर्वपेत्॥ सर्वत्राग्नेतरसंसर्गे संस्रष्टमग्नि
मरण्योः समारोप्य मथित्वोपावरोह्याग्नेर्निष्कृतिः कार्या॥ लौकिकाग्नि
संस्रष्टस्य यानयेवेष्ट्वाविवेकसिद्धेन समारोपणाद्यपेक्षेतिमतांत
रमुपन्यस्तं भाष्यकारेण॥ यद्याहिताग्निः स्वकीयाग्निव्यतिरेकादन्या
ग्निषुयजेत॥ यदि वास्यान्योग्निषुयजेततत्र पाथिकेष्टिः प्रायश्चित्तं॰ ती
र्थयात्राद्यर्थं प्रवासं कुर्यान्नतीर्थयात्राद्यर्थं प्रवासं
करिष्यन्नुपरुध्यानं कृत्वा प्रवसेत्॥ यदि देवान्मानुषाद्वानिमित्ता ५५

त्प्रवासोपरुध्यानमकृत्वा गच्छेत्तदायत्रैवस्थितस्य गमनप्रसक्तिस्तत्रैवोत्प
त्तिकमेणाग्नीन्ध्यात्याग्न्यभिमुखउपविशेत॥ इदमेवसंतत्रसंतंत्वाग्नेहृ
दयाचामनसाविशर्मि॥ तिरोमासंतंमाप्रहासीज्ज्योतिषात्वायेश्यानरै
ऽोपविशतितोगच्छेत्॥ प्रवसितस्यपर्वप्रासोवपनंश्मश्रुमममामि
षमित्यादिनियमाश्चभवंति॥ होमकालेऽग्निकालेचयाजमानमेत्यजपः॥ ब्र
ह्मचर्यंच॥ अग्निसमीपरुद्धपत्नीनियतासतीत्यग्नीन्परिरक्षनाशक्तिं
गादिनाग्निहोत्रंपिंडपितृयज्ञदर्शपूर्णमासौ॰ आग्रयणंचकालप्राप्तेक

६० रयेत॥ नाग्न्यणमित्येके॥ सर्वत्रत्यागंस्वयमेवकुर्यात्॥ आहुश्चमंडनः॥
त्यागंचसर्वथाकुर्यान्नचाप्यन्यतरस्तयोः॥ उभावप्यसमर्थौचेन्नियुक्तः
कश्चनत्यजेदिति॥ पत्न्यारजस्वलायांयाप्रस्तायामथापिवा॥ पूर्वमे
वनियुक्तःसकुर्यादित्यधोचितमिति॥ दोषोत्तरंसन्नियोजनंसंवृतो न
त्तिद्योत्यतेतेनयजमानस्यसंवत्सरादूर्ध्वंप्रवासेपुनराधानंपवित्रे
ष्टिरितिसंक्षेपः॥ अथाहिताग्नेःप्रवासोपरिछेतोपत्न्यासहप्रया ६०
णविषयोविधिरुच्यते॥ आयश्चित्तप्रदीपे॥ यजमानःपत्न्यासहनम

वसेत्॥ बहुपत्नीकोप्येकयासहनप्रवसेत्॥ अस्मुपायीप्रभवतीतियो
यंस्त्रीप्रवासनिषेधः॥ स्त्रीमैथुननिषेधस्यप्रवासेपत्नीसाहित्यए
वप्रवृत्तिः॥ तेनस्त्रीसहितस्यैवाहिताग्नेःप्रवासोवाच्यः॥ सतुयजमा
नःपत्नीचोभौग्रामांतःसीमांतरबहिःसीमांवातिक्रम्ययदिप्रवसे
त्तदाग्नयोलौकिकाभवंतीतिवचनेनबाधितानेकपत्नीविषयोभवि
ष्यति॥ ज्येष्ठाचेदग्निसंयुक्तागच्छेदन्यायथारुचि॥ यजमानेनसहिता
यदाताएवकेवलाइतिवचनात्॥ नत्वाहकोष्ठाविषयइतिएतदुक्तंम

६१ वति॥ आहिताग्निरेकयासहाग्नीनाधायानंतरंपरिणीतयाअकृता
ग्निसंसर्गयापत्न्यासहप्रवासंकुर्यात्॥परंतुमैथुनंनकुर्यादिति॥ऋतौभा
र्यामुपेयादिति॥ऋतुगमनेनदोषः॥अतएवज्येष्ठाचेदग्निसंयुक्तेत्यकृ
यजमानेअसंनिहितेपत्न्याअपिप्रवासेवैधायनोक्तसंकटातिरिक्त
एवभवति॥नान्यथाप्रयोजनाभावात्॥तस्याचप्रवसत्यांनप्रवासो
परुद्धानं॥संवत्सरमतिप्रवसत्यांपवित्रेष्टिःपुनराधानंचेत्यादियज
मानवत्॥प्रवासादागतस्याशुचित्वेपितत्कालंस्नानेनशुद्धस्याग्नि ६१

---

६२ संबंधआगमनविधिःसचोपिनवति॥यथाहमंउनः॥रजोदोषेसमुत्पन्नेसूतकेमृ
तकेपिवा॥नित्यंनैमित्तिकंकुर्यात्काम्यकर्मनकिंचनेति॥अनेनागतिकगमनविधि
रप्यनुज्ञातोभवति॥यत्तु॥रजोदोषेसमुत्पन्नेसूतकेमृतकेपिवा॥प्रवसन्नग्निमा
न्नित्यःपुनराधानमर्हतीतिवचनंतदग्नियुक्तस्यगमननिषेधकं॥अन्यथाग्निमृ
त्पत्स्यवैयर्थ्यात्॥यानितुसूतकादौप्रवासविधानादिनिषेधकानिकुत्रचित्कौ
श्चित्पठ्यंतेवचनानितानिस्मार्त्तविषयाणीतिबोध्यं॥॥अथादीक्षमनंतेनशिष्टे
ष्टजननुएये॥प्रायश्चित्तविधिर्होमःसंक्षेपाच्चनिरूपितः॥इत्येवंरघुनाथेनप्राय
श्चित्तकुतूहले॥निर्मितेविहितेहोमप्रायश्चित्तविवेचनं॥इतिनवरत्नरघुनाथभट्टविर ६२

॥कृतिप्रायश्चित्तकुतूहले होमप्रकरणं॥

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY

होमप्रकरणं

अथप्रायश्चित्तकुतूहले होमप्रकरणस्यानुक्रमः

१ मंगलाचरणं०
१ प्रादुष्करणकालःप्रा०
२ विहरणकालःप्रा०
३ अनुद्धरणप्रा०
३ अनुद्धरणप्रयोगः०
४ दृष्टिस्थानेपूर्णाहुतिः०
५ प्रातरनुद्धरणप्रा०
६ मित्रसूर्येष्टिप्रयोगः०
७ व्रातपतेष्टिप्रयोगः०
८ अजस्रपक्षेप्रादुष्करणलोपेप्रा०
८ पूर्णाहुतिप्रयोगः०
९ उदयेत्तेचसुनस्यजमानस्यप्राय०
९ अथविहरणपक्षेअग्न्यनुगमनेप्रा०
११ तपस्वतेष्टिप्रयोगः०
१२ अथाचाहिताग्नेर्जस्रान्वी
१२ दक्षिणाग्न्यनुगमनेप्रा०
१३ ज्योतिष्मतेष्टिप्रयोगः०
१४ पूर्णाहुतेर्हुतायामाहवनीयानुगमनेप्रा०
१४ हिरण्यनिधानेविशेषः
१५ आहवनीयहोमोत्तरंगार्हपत्यस्यदक्षिणाग्नेर्वानयेप्रा०
१५ गार्हपत्याहवनीययोर्युगपद्भारेप्रा०
१५ गार्हपत्यदक्षिणाग्न्यनुगमेप्रा०

१५ दक्षिणाग्न्याहवनीययोर्यु
गपन्नात्रेप्रा०
१६ उदयास्तमयाकालेग्निर्न
जायेतत्तदालौकिकाग्नौहोमः०
१६ मध्यमानोग्निर्जातःपुनर
नुगतःप्रा०
१६ उदयास्तमयेसर्वाग्निनाशो०
१८ लौकिकाग्नौहोमेकृतेद्विती
यहोमकालेग्निर्नजायेतनु
नराधानंप्रा०
१८ दक्षिणाग्निमनुध्यभ्रमा
दाहवनीयंप्रणयेत्प्रा०
१८ मंत्रेणविनाहवनीयप्रण
यनेप्रा०
१९ प्रयोगमध्येप्रधानहोमा
त्पूर्वपूर्वाग्नेरविद्यमान
भ्रमेणोपर्यन्यप्रणयेत्प्रा०
१९ अंगारवहिःपातेग्निवते
ष्टिःप्रयोगः
२० गार्हपत्यानुगमभ्रमान्मं
थनेप्राय०
२० आहिताग्निविरहणोत्त
रंब्रह्मचारीभवेयातां०
२१ व्रतलोपेप्राय०
२१ आहिताग्नीविहरणोत्तर
होमात्प्राङ्भीयातां०
२१ अध्वर्युद्वारोहोमेतस्यापि
नभक्षणंप्रा०
२२ अस्तमितेहोमस्यलक्षणं०
२२ होमकालावधेर्नियमः०
२२ नित्यहोमयजमानस्यमुख्य
कर्तृत्वंप्रा०
२३ सन्निहितेयजमानेन्यद्वा
रोहोमप्रकरणेप्राय०

होमप्रकरणं

२३ स्वयंहोमंसंपूर्णफलंप्रा०
२३ अन्यद्वारार्धफलंप्रा०
२४ सूतकेहोमाधिकारः०
२५ सूतकेकाम्यकर्मनुकार्यं०
२५ सूत्रेनऋत्विजेनहोमोदेयः०
२५ आपदिब्राह्मणमात्रस्या
धिकारः०
२५ अन्यद्वारोहोमेउभयोस
न्निधानं०
२५ उभयोसन्निधानंविना
होमेप्राय०
२५ अस्नातेनहोमेदत्तेप्रा०
२६ अग्निवरणवतेष्टिप्रयोगः
२६ यजमानोवृद्धआतुरश्चेद
न्यद्वारप्राय०
२६ राज्ञःस्वयंहोमंनकरोति०
२६ सायंप्रातर्होमेएकस्याधिकारः०
२६ शुल्कमेप्राय०
२६ द्रव्यस्याप्येवंनियमः
२६ प्रथमहोमारंभेप्रस्तरजु
हवलायांप्राय०
२६ अग्निनारोअविधिनोसत्तौ०
२७ प्रगुदगास्तमयादन्यथाकृतेसाते०
२७ सर्वेष्वग्निषुयत्नंविनाप्र
ज्वलितेषुप्रा०
२७ परिषेचनादेर्जलेनाप्युप
घातेप्राय०
२८ अथहोमद्रव्याणि०
२८ मुख्यद्रव्याभावेप्रतिनिधिः०
२९ अथहविर्दोषाप्रा०
२९ अग्निहोत्र्युपवस्थाद्यु
द्यमानोपरिशेत्०
३१ अधिश्रितंद्रव्यंविष्यंदति
स्कंदतेवाप्राय०

३१ प्राचीनहरणेपयसःस्कंदने०
३२ उन्नयनादिपूर्वाहुतिपर्यंतं
दुग्धेन्यहविषिवास्कंने०
३२ प्राचीनहरणकालेयावतिग
तेस्कंनंतत्रउपविष्टउन्नये
न्नस्रुचंप्रयत्नेरयेत्०
३२ वारत्रीजपःअनरानमाहि
तीयहोमकालात्०
३२ अथतत्प्रयोगः०
३३ अग्निहोत्रद्रव्यंस्थालीमु
लेनस्रवतिचेत्रा०
३३ उद्वासितस्यान्यद्रव्यस्य

३४ अथअग्निहोत्रस्थालीभि०
३४ स्थालीभेदेनभिन्नद्रव्यस्यप्रा०
३४ अग्निहोत्रंव्यधिश्रितंत्रान्येत्०
३५ उद्वासितस्यविष्यंदेप्रा०
३५ साधारणद्रव्यविष्यंदेप्रा०
३६ अथकेशादिभिदुष्टेप्रा०
३६ अथपिपीलिकाक्षुद्रकीटाद्यु
पहतस्यप्रा०
३६ अग्निहोत्रद्रव्येवृष्टिबिंदुपाते०
३७ अग्निहोत्रहविःपाकार्थंनिष्का
सितांस्यांगारानुगमेप्रा०

३७ अंगारनिष्कासनानंतरं
गार्हपत्यानुगमनेप्रा०
३७ उत्तराहुतिस्कंदनादौप्रा०
३८ पयद्रव्यव्यतिरिक्तस्कंनेप्रा०
३८ पूर्वाहुतौहुतायांयघुत्तरा
हुतिस्कंदेत्प्रा०
३८ पूर्वाहुतेरपरिवोत्तराहुतिपतेत्०
३८ पूर्वाहुतिंविस्रस्योत्तरा
हुतिंजुहुयात्प्रा०
३९ अग्निहोत्रउपसन्नेअग्नी
नोऋत्विजावांतरागमनेप्रा०

होमप्रकरण

४१ द्विपदचतुष्पदादीनांगमने०
४१ अग्नीनांपरिवेत्रादिभिःस्पर्शे०
४२ अग्नेर्बहिःपातेप्राय०
४२ सर्वाग्नेर्बहिःपातेप्राय०
४३ होमकालात्ययेप्राय०
४४ प्रदोषसंगवलक्षणंप्राय०
४६ सायंविहृतेष्वग्निषुहोमांत
रकालेप्रातेप्राय०
४६ प्रातर्होमार्थंविहृतेष्वग्निषु०
४० द्वितीयप्रातर्होमप्रकर्षेप्रा०

४८ अग्निहोत्रषण्मासाकरणे०
४८ प्रोषितेयजमानेहोमभेदे०
४८ चतुर्हविष्केष्टिप्रयोगः०
४८ सप्तहविष्केष्टिप्रयोगः०
४९ अथाग्निहोत्रसमासः०
४९ अनापदिपक्षहोमेप्राय०
५० पाणिसमारोपविधिः०
५१ अरणीसमारूढेष्वग्निष्व
रणीनाशेप्राय०
५१ अरण्योश्चांडालस्पर्शेप्रा०

५२ अरणीविष्टनप्रकारः०
५२ अरणीसमारूढा
ग्निनाशेप्राय०
५३ नूतनारणीग्रहण
विधिः०
५५ पाणौसमासरोपे
ऋत्विजमानेम
तेप्राय०
५५ अरण्योरभावेपाला
शविधिः०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

५५ लुप्तमतेष्टिप्रयोगः०
३ ५६ अथाग्न्युपघातप्रा०
५६ अग्नीनांरजस्वलाचांडालादिस्पर्शेप्राय०
५६ ज्ञाताऽज्ञातस्पर्शेग्नीनां०
५६ मनुष्यादिमसलेरग्न्युपघातेप्राय०
५६ जातामृतास्पृशेच्चस्पर्शे०
५६ अग्न्यगारदाहेयजमानस्यगृहदाहेप्राय०
५६ क्षामवतेष्टिप्रयोगः०
५७ अग्नीनांत्रावाग्निसंसर्गेप्राय०
५७ शुचेष्टिप्रयोगः०
५८ गार्हपत्यादिसर्वेषामग्नीनांद्वयोर्वापरस्परसंसर्गे०
५८ विधिचेष्टिप्रयोगः०
५८ गार्हपत्याहवनीययोःसंसर्गेप्राय०
५८ वीतयेष्टिप्रयोगः०
५८ वैद्युताग्निसंसर्गेप्रा०
५८ ग्राम्याग्निनासंसर्गेसंवर्गेष्टिःप्रा०
५९ यस्याग्नयोन्येरग्निभिःसंसृज्येरन्क्षामवतेष्टिप्र०
५९ यस्याग्नयआरण्येनाग्निनासंदह्येरन्०
५९ आहिताग्निःस्वकीयाग्निभ्रमादन्याग्निषुयजेत्०
५९ आहिताग्निर्धनार्जनार्थंप्रवासंकुर्याद्भ्रातीर्थार्थे०
५९ जातकाग्निसंसर्गेप्रा०

होमप्रकरण

६० प्रवासोपस्थानमकृत्वागच्छेत्०
४ ६० प्रवासितस्यनियमाः०
६० गृहपत्नीऋत्विक्द्वारादर्शपूर्णमासादिकारयेत्०
६० संवत्सरादूर्ध्वंप्रवासनिषेधः०
६० आहिताग्नेःपत्न्यासहप्रवासनिषेधः०
६१ बहुपत्नीकोएकयासहनप्रवसेत्प्राय०
६१ एकयासहप्रवासेमैथुनंनकार्यं०
६१ संकटवशात्स्त्र्याश्चापिप्रवासेसंवत्सरमतिक्रम्यनप्रवसेत्प्राय०
६१ प्रवासादागतस्यापिअशुचिरेतत्कालंस्नानेनशुद्धेरागमनविधिःसर्वोपिभवति०
६२ सूतकेप्रवासप्रसक्तौ०
इतिप्रायश्चित्तकुतूहलेहोमप्रकरणस्यानुक्रमणिकासमाप्तिमगमत्

४